M. T. B. COLLEGE, SURAT
*Manuscripts Library*

No. Ref. / Ser. 1215

Title: Vishnu Panjar Stotra

1215

Complete

C

| | | | |
|---|---|---|---|
| | Vishnu Panjar Stotra - Brahmand Puran - | | Title |
| | | | ~~Author~~ |
| | | | Editor |
| | | | Year, Vols. |
| SM | | | Publisher |
| 1215 | | | Remarks |

29/11/51

महादेव रक्षरक्ष महेश्वर ॥१४॥ रक्षंतु देवताः सर्वे ब्रह्मा विष्णु महेश्वरः ॥ जलेरक्ष
तु वाराहः स्थले रक्षतु माधवः ॥१५॥ अटव्यां श्रीनरसिंहश्च सर्वतः पातु केशवः ॥
दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चंद्रमा ॥१६॥ पंथानं दुर्गमे रक्षेत्सर्वमेव जनार्द
४ नः ॥ नरोगो न विश्चैव ब्रह्महत्या गुरुतल्पगः ॥१७॥ स्त्रीहत्या बालघाती च सुरापी
वृषलीपतिः ॥ मुच्यते सर्वपापेभ्यः पठनान्नात्र संशयः ॥१८॥ अपुत्रो लभते पुत्रान्
धनार्थी लभते धनं ॥ विद्यार्थी लभते विद्यां मोक्षार्थी लभते गतिं ॥१९॥ आपदां
हरते नित्यं विष्णुस्तोत्रार्थसंपदा ॥ यस्त्विदं पठते स्तोत्रं विष्णुपंजरमुत्तमं ॥२०॥
मुच्यते सर्वपापेभ्यो विष्णुर्लोकं स गच्छति ॥ गोसहस्रफलं तस्य वाजपेयशता
नि च ॥२१॥ अश्वमेधसहस्राणि फलं प्राप्नोति मानवः ॥२२॥ जले विष्णुः स्थले वि
ष्णु विष्णुः पर्वतमस्तके ॥ ज्वालमालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥२३॥ इ
ति श्रीब्रह्मांडपुराणे इंद्रनारदसंवादे विष्णुपंजरस्तोत्रं संपूर्णं ॥ लेषकपाठये

रस्य ब्रह्मणोदितं ॥ तदहं संप्रवक्ष्यामि आत्मरक्षाकरं परं ॥३॥ पादौ रक्षतु गोविंदो जंघे
चैव त्रिविक्रमः ॥ ऊरू मे केशवो रक्षेत् कटिं चैव जनार्दनः ॥४॥ नाभिं चैवाच्युतो रक्षे
त् गुह्यं चैव वामनस्तथा ॥ उदरं पद्मनाभश्च पृष्ठे चैव तु माधवः ॥५॥ वामपार्श्वे स्थितो
१ विष्णुः दक्षिणे मधुसूदनः ॥ बाहू भ्यां वासुदेवश्च हृदे दामोदरस्तथा ॥६॥ कंठे र
क्षतु वाराहः कृष्णश्च मुखमंडले ॥ माधवः कर्णमूले तु हृषीकेशश्च नासिके ॥७॥
नेत्रे नारायणो रक्षेल्ललाटे गरुडध्वजः ॥ कपोलौ केशवो रक्षेद्वैकुंठः सर्वतो दिशि ॥८॥
श्रीवत्सो पि तु सर्वेषामंगानां चैव रक्षतु ॥ पूर्वस्यां पुंडरीकाक्षः आग्नेयां श्रीधरस्त
था ॥९॥ दक्षिणे नारसिंहश्च नैऋत्यां च दामोदरश्च ॥ पुरुषोत्तम वारुण्यां वाय
व्यां पीतवाससः ॥१०॥ गदाधरस्तु कौबेर्यां शंखवृद् ईशानतो दिशि ॥ आकाशे च गदा
रक्षेत्पाताले चक्रदर्शनः ॥११॥ सन्नद्धः सर्वगात्रेषु प्रविष्टो विष्णुपंजरं ॥ विष्णुपंज
र प्रविष्टोहं विचरामि महीतले ॥१२॥ राजद्वारे पथे घोरे संग्रामे शत्रुसंकटे ॥ नदीषु
तरणे चैव चौरव्याघ्रभयेषु च ॥१३॥ डाकिनीप्रेतभूतेषु भयं तस्य न जायते ॥ रक्षरक्ष

श्रीगणेशाय नमः ॥ अस्य श्रीविष्णुपंजरस्तोत्रमंत्रस्य नारदऋषिरनुष्टुप् छंदः ॥ श्रीविष्णु
परमात्मा देवता अहं बीजं सोहं शक्तिः ॥ ॐ ह्रीं कीलकं मम सर्वदेवरक्षणार्थे जपे विनियो
गः ॥ नारदऋषये नमः शिरसि अनुष्टुप् छंदसे नमः मुखे श्रीविष्णुपरमात्मा देवतायै नमः ॥
हृदये अहं बीजं गुह्ये सोहं शक्तिः ॥ पादयोः ॐ ह्रीं कीलकं पादाग्रे ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ मं
त्र ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अ
नामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ ॐ
ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वौषट् ॥ ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं
नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ इति न्यासः ॥ अहं बीजं प्राणायामत्रयं कुर्यात् ॥
पूरकं कुंभकं रेचकं च त्रासकं ॥ दक्षिणनाडी च पुटे बद्धे कुंभकं रेचकं वामनाडी च प्रा
णायामो च्यते ॥ अथ ध्यानं ॥ परंपरस्यात् प्रकृतेरनादिमेकं निविष्टं बहुधा गुहायां
सर्वालयं सर्वचराचरस्थं ॥ नमामि विष्णुं जगदेकनाथं ॥ १ ॥ विष्णुपंजरमहादिव्यं
सर्वदुःखनिवारणं उग्रतेजो महावीर्यं सर्वशत्रुनिकंदनं ॥ २ ॥ त्रिपुरं दह्यमानस्य ह